रघुवंशः

३६७

२५ पत्रा...

सं. ३ ४१८५

रुद्राक्षी

(अपूर्ण)

कागज़ ७

३२ पत्राणि

कर्ता –

मा. जयकिशन

[illegible]

१०

ॐ विघ्ननाशाय नमः। वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वंदे पार्वतीपरमेश्वरौ ।१।
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः। तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं ।२। मंदः क-
।१। वियशःप्रार्थी गमिष्याम्युपहास्यतां। प्रांशुलभ्ये फले मोहादुद्बाहुरिव वामनः ।३। अथवा कृ-
तवाग्द्वारे वंशेस्मिन्पूर्वसूरिभिः। मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।४। सोहमाज-
न्मशुद्धानामाफलोदयकर्मणां। आसमुद्रक्षितीशानामानाकरथवर्त्मनां। यथाविधिहु-
ताग्नीनां यथाकामार्चितार्थिनां। यथापराधदंडानां यथाकालप्रबोधिनां ।६। त्यागाय संभृ-
तार्थानां सत्याय मितभाषिणां। यशसे विजिगीषूणां प्रजायै गृहमेधिनां ।७। शैशवेभ्यस्त-
विद्यानां यौवने विषयैषिणां। वार्द्धके मुनिवृत्तीनां योगेनांते तनुत्यजां ।८। रघूणामन्वयं
वक्ष्ये तनुवाग्विभवोपि सन्। तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ।९। अ तं संतः श्रो राम
।१।

दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः॥ व
क्त्रोष्मणा मलिनयंति पुरोगतानि लेह्यानि सैंधवशिलाशकलानि वा
हाः॥७३॥ भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भे
दशून्याः प्रदीपाः॥ अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुक
स्ते मंजुवाक्पंजरस्थः॥७४॥ इति विरचितवाग्भिर्बंदिपुत्रैः कुमारः स
पदि विगतनिद्रस्तल्पमुज्झांचकार॥ मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गांगं सैकतं सुप्रतीकः॥७५॥ अथ विधिमवसाय्य शास्त्रदृ
ष्टं दिवसमुखोचितमंचिताक्षिपक्ष्मा॥ कुशलविरचितानुरूपवेषः क्ष
ितिपसमाजमगात्स्वयंवरस्थं॥७६॥ इति श्रीरघुवंशे महाकाव्ये कालिदा

स ह्लतौ स्वयंवराभिगमनो नाम पंचमः स्सर्गः ॥ ॐ ॥ ह्व ॥ ह्व ॥ ह्य ॥ ह्य ॥ ॥

स तत्र मंचेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवल्गु । वैमानिका

नां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥१॥ रतेर्गृहीतानुन

येन कामं प्रत्यर्पितस्वांगमिवेश्वरेण ॥ काकुत्स्थमालोकयतां नृपाणां मनो

बभूवेंदुमतीनिराशं ॥२॥ वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन

मंचं ॥ शिलाविभंगैर्मृगराजशावस्तुंगं नगोत्संगमिवारुरोह ॥३॥ परार्ध्य

वर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः ॥ भूयिष्ठमासीदुपमेय

कांतिर्मयूरपृष्ठाश्रयिणा गुहेन ॥४॥ तासु श्रिया राजपरंपरासु प्रभा वि

उदारमध्ये नेपथ्यभृतां ...

ह्रोषोदयदुर्दिनिदृश्यः॥ सहस्रधामात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्यु
तेव॥५॥ तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां समध्ये॥ ररा
जधाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः॥६॥ नेत्रव्रजाः पौ
रजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः॥ मदोत्कटे रेचितपुष्पवृ
र॰ ३५ क्षा गंधद्विपेव वन्य इव द्विरेफाः॥७॥ अथ स्तुते बंदिभिरन्वयज्ञैः सोमार्क
वंश्ये नरदेवलोके॥ संचारिते चागरुसारयोनौ धूपे समुत्सर्पति वै
पताका जयंती॥८॥ पुरोपकंठोपवनाश्रयाणां चिरवंडिनामुद्धननृत्यहेतौ॥
प्रध्मातशंखे परितो दिगंतांस्तूर्यस्वने मूर्छति मंगलार्थे॥९॥ मनुष्यवा
यस्य गंधैः समाघ्रायन निषं ... स्तैर्न ग्राहुन्नृपतेर्वि...

नवबहू॥ वर्णमाने सति।

ह्यंचतुरंस्रयानमध्यास्य कन्यापरिवारशोभि ।। विवेश मंचांतरराजमार्गं पतिं-
वरा क्लृप्तविवाहवेषा ।।१०।। तस्मिन्विधानातिशये विधा-
तुः कन्यामये नेत्रशतैकलक्ष्ये ।। निपेतुरंतःकरणैर्नरेंद्रा देहैः स्थिताः
केवलमासनेषु ।।११।। तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्र-
दूत्यः ।। प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः ।।
१२।। कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं ।। रजोभिरं- भि
तः परिवेशबंधि लीलारविंदं भ्रमयांचकार ।।१३।। विस्रस्तमंसादप-
रो विलासी रत्नानुविद्धांगदकोटिलग्नं ।। प्रावारमुत्कृष्य यथावकाशं नि-
नाय साचीकृतचारुवक्त्रः ।।१४।। आकुंचिताग्रांगुलिना ततोऽन्यः किंचि- ३८

साचीतीर्यक्त्वं

प्रावारं उत्तरीयं

तौ

प्रासाद वासायन संस्थितानां नेत्रोत्सवं पुंसु पुरांगनानां

नयो-के तत्र वेक्ष्याकिं चिद्वि स्वं स्तिइर्यौ कमंध्य कमात्का ॥ सदु प्रया

मात्रिय यैव तन्वी प्रसादि दितौ नम भाषमाणा ॥६५॥ तां सेववेत्र

महगोनियुक्तारा डां तरं राडस्तु तां निनाय ॥ स्मार गोह्येव त

रगमालापमांतरं मान सराडह सी ॥६६॥ जगाद चैनाम यमंगना

यः सुरांगनाप्रार्थितयो वनश्रीः ॥ विनीत नागः किल सूत्रकारे

रैंद्रं पदं त्र मिगतो पिपुंक्के ॥६७॥ अनेन पर्यासय ताश्रु बिंदून् मु

क्ताफलस्थूलतमां स्तनेषु ॥ प्रसर्पिताः शत्रु विलासिनीना मास्विप्य ॥ प्रवर्तते

सूत्रं कारं शास्त्रं कुर्वतीति सूत्रकाराः पालकाप्यगो...

ज्ञानि वेंधु च हतीन डन्या:॥ स मा मृन्नृणा डानी वच्छाइस नर:
डन्यो परवंधु आति प्रियपर सहिते छितिविम्ब:॥ ३

सूत्रेणाविनेव हारा:॥२८॥ निसर्गभिन्नास्पदमेकसंस्थमस्मिन्
द्वयं श्रीश्च सरस्वती च॥ कांसागिरास्तून्नतया च योग्यात्वमेव कलया
जितयोस्तु तीया॥३०॥ अथांगराजादवतीर्य चक्षुर्याहीति जन्या
नवद कुमारी॥ नासौ न काम्यो न च वेद सम्यक् द्रष्टुं न सा भिन्नरु
चिर्हि लोक:॥३१॥ तत: परं दु:प्रसहं द्विषद्भि: र्वै पं नियुक्ता प्रतिहा
रभूमौ॥ निदर्शयामास विशेषदृश्यमिंदुं नवोत्थानमिवेंदुम
से॥३२॥ अवंति नाथोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तम
:ध्य:॥ आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति॥ ३३ ३४

३६ ३६ ३६

...स्थाशानिकरोद स्थानिर्गमद्वारि वारिणः। शास्त्रमाऽनयंत्रं च यमोपचमणाकर्मभ्यीतिकरा

अस्य प्रयाणेषु समग्रशक्ते रग्रेसरैर्वाजिभिरुत्थितानि ॥ कुर्वंति सा
मंतशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ॥३३॥ आसौ महा
कालनिकेतनस्य वसन्नदूरे किल चंद्रमौलेः ॥ तमिस्रपक्षेपि स
ह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ॥३४॥ अनेन यूना सह
पार्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते ॥ सिप्रातरंगानिलकंपिता
सु विहर्तुमुद्यानपरंपरासु ॥३५॥ तस्मिन्नभिद्योतितबंधुपद्मे प्रता
प संशोषितशत्रुपंके ॥ बबंध सा नोत्तमसौकुमार्या कुमुद्वती भानु
मतीव भावं ॥३६॥ तामग्रतस्तामरसांतराभामनूपराजस्य गुणैरनूनां

नां ॥ विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सुदतीं सुनंदा ॥ ३७ ॥
संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः ॥ अनन्य
साधारणराजशब्दो बभूव योगी किल कार्त्तवीर्यः ॥ ३८ ॥ अका
र्यचिंतासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् ॥ अंतःशरी
रेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ॥ ३९ ॥ ज्याबंधनि
ष्पंदभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण ॥ कारागृहे निर्जितवा
सवेन लंकेश्वरेणोषितमाप्रसादात् ॥ ४० ॥ तस्यान्वये भूपतिरेष जा
तः प्रतीप इत्यागमवृद्धसेवी ॥ येन श्रियः संश्रयदोषरूढं स्वभावलो

39

ल्लेयय शाः प्रमृष्टं ॥४१॥ आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रि
यकालरात्रिं ॥ धारांसि तां रामपरस्वधस्य संभावयत्युत्पलपत्र
सारां ॥४२॥ अस्यांकलक्ष्मीर्भव दीर्घबाहो माहिष्मतीवप्रनितंबकां
चीं ॥ प्रासादजालेर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः
॥४३॥ तस्याः प्रकामं प्रियदर्शनोपि न स क्षितीशो रुचये बभूव ॥ श
रत्प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥४४॥ सा
सूरसेनाधिपतिं सुखेणमुद्दिश्य लोकान्तरगीतकीर्त्तिं ॥ आचार
शुद्धोभयवंशदीपं शुद्धांतरक्ष्या जगदे कुमारी ॥४५॥ नीपान्वयः पा

वप्रं प्राकार

...ीरवाहः ...ीकृतेन ...ोऽभ्य... ॥४

संरूढां कुरितो प्रो दिद २ मंदिरं नगरं गावेषां ... पं न यानं ये

र्थिपूरणाय द्युत्या गुणैर्यं माश्रित परस्परेण ।। सिद्धाश्रमं शांतमिवैत्य सत्वैर्नैसर्गिकोप्युत्ससृजे विरोधः ।।४६।। यस्यात्मगेहे नयनाभिरामा कांतिर्हिमांशोरिव संनिविष्टा ।। हर्म्याग्रसंरूढतृणांकुरेषु तेजोविषह्यं रिपुमंदिरेषु ।।४७।। यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारिविहारकाले ।। कलिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति ।।४८।। त्रातेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः ।। वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णं ।।४९।। संभा

३८

कालिंदी सूर्यतनया यमुना इमे ... अवरोधस्तरोधायाने राज्ञा दारेषु नदृते ...
नरवर्त्मा ।।४

कुबेरकिरावन

व्यपत्तोरमनुयुवानम्रदुत्रवाक्षोत्तरपुष्पत्राप्ये।। चंदावने चैत्र
रथादनूनै निर्विश्य तां सुंदरियौवनश्रीः।।५०।। अध्यास्य यंत्र
एषा तो स्मितानि शैलेयनद्धानि शिलातलानि।। कस्यापि नांश्र
चूषिपश्यनस्पं कीतास्फुगोवर्धनकंदरासु।।५१।। न्टपं ... वर्त
मनोज्ञनाभिः स्वाव्यसगादन्यवधूपवित्री।। महीधरमार्गवशा
दुपेतं स्रोतो च हासागरगामिनीव।।५२।। अथांगदाश्लिष्टभुजंभु
ङिष्या हेमांगदं नाम कलिंगनाथं।। आसेदुषीं सादितशत्रुप
सेनाक्षामवार्लेंडुमुखी वभाषे।।५३।। असौ महेंद्राद्रिसमा
नवज्ञानकैं करधैव्यदुकिष्मा
परिखाकिता।।

अनुपरू
पनोर

आयतेःप
यसोपमु

श्रसंयाकर्षणस्यक्रियावैरेव ॥२

नसारः पतिर्मेहैवं स्याम्मगोद्वं धेच्छ ।। पस्यासृत्सैन्यगडाछके
नपात्रास्तुयालीवकुरोमरुंद्रः ।।५४।। अया घौत रेरेय स्तुक्कुडो
स्तुडाव्यां विप्रत्तियश्चापश्र तांपुरोगः ।। रिपुप्रियः सांडान
बाष्पसेकेबंदीकृतायाइवपहृतीद्वे ।।५५।। यमाम्मनः सम्भानि
संनिविष्टमंद्रघनिसाडितयामत्कूर्यः ।। प्रासाद वातायनतद्दे
च्युवीचिः प्रबोधयत्सर्पिवएव स्तुत्तं ।।५६।। अनेनसार्हं वि
हरांबुराशेस्तीरेषुतालीवनमर्मरेषु ।। द्वीपांतरानीतल

मदांस
विवा ।।०
३९
३४
३९

वंगपुष्पैरपाकृतस्वेदलवामरुद्भिः ॥५७॥ प्रलोभिताप्याकृतिलोभनीया
विदर्भराजावरजा तयैवं ॥ तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्र
तिकूलदैवात् ॥५८॥ अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देव
समानमेत्य ॥ इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद
भोज्यां ॥५९॥ पांड्योयमंसार्पितलंबहारः कॢप्तांगरागो हरिचं
दनेन ॥ आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिरा
जः ॥६०॥ विंध्यस्य संस्तंभयिता महाद्रेर्निःशेषपीतोज्झितसिंधु
राजः ॥ प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यग ३९

स्त्यो [illegible] नपृच्छतीति सौस्नातिकः

स्य: ॥ ६१ ॥ अस्त्रं हरादाप्त वता दुरापं येनेंद्र लोकाव दयायदस्य: ॥
पुरा जनस्यान विमर्द्द शंकी संधायकं काधिपति: प्रतस्थे ॥ ६२ ॥
अनेन पाणौ विधिनाग्रहीते महाकुलीनेन महीव गुर्वी ॥ रत्ना
नुविद्धार्णवमेखलाया दिशः सपत्नी सवदक्षिणस्या: ॥ ६३ ॥
तांबूलवल्लीपरिणद्धपूगास्वेलालतालिंगितचंदनासु ॥ तमा
लपत्रास्तरणासु रंतुं प्रसीद शश्वन्मलयस्थलीषु ॥ ६४ ॥
इंदीवरश्यामतनुर्नृपोसौ त्वं रोचना गौरशरीरयष्टि: ॥ अन्यो
न्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥ ६५ ॥ स्वसु

॥२

सर्गः

40

र्चिदर्थाभिपतेस्तदीयो लेभेंतरं चेतसि नोपदेशः ॥ दिवाकराद्द
र्शनबद्धकोशे नक्षत्रनाथांशुरिवारविंदे ॥६६॥ संचारिणी दीप
शिखेव रात्रौ यंयं व्यतीयाय पतिंवरा सा ॥ नरेंद्रमार्गाट्ट इव प्रपे
दे विवर्णभावं स स भूमिपालः ॥६७॥ तस्यां रघोः सूनुरुपस्थि
तायां वृणीत मां नेति समाकुलोऽभूत् ॥ वामेतरः संशयमस्य बाहुः
केयूरबंधोच्छ्वसितैर्नुनोद ॥६८॥ तं प्राप्य सर्वावयवानवद्यं व्या
वर्तनान्योपगमात्कुमारी ॥ नहि प्रफुल्लं सहकारमेत्य वृक्षांतरं कां
क्षति षट्पदाली ॥६९॥ तस्मिन्समावेशितचित्तवृत्तिमिंदुप्रभा
द्विरेफपुष्कलीभूतगवद्ददत्रमवाल्लपः ॥१

ति केनचः अस्र होनाति अयघाले सोमसंक्षेपर द्वांतरे ॥ भुष्कस्य हितन्तु लाये त्रिसुप सौदने मत ॥

गुणो: प्रतीतेनुकूल तल लक्षणाहित तल्ल लक्षणो इत्यभूत्॥ २
लक्षणैर्गुणोः आहित तरव्यातः॥

मिंदुमतीं विलोक्य प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमि
दं सुनंदा॥७०॥ इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहित
लक्षणोऽभूत्॥ काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तर
कोशलेंद्राः॥७१॥ महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपि
नाकलीलः॥ चकार बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत्र
लेखाः॥७२॥ ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमं
गदेन॥ उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोधित
स्थौ॥७३॥ जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः॥

माहात्मना

गोत्रापर्वता

...धानानुविवग्धायान तं कामम त्याषिति इति वं आयता २

अतिष्ठदेकोनशतं क्रतूनां चेत्राक्रम्य स्तुया विनिवृत्तपेयः ॥७४॥ यस्मि
न्मही शासति वाणिनीनां निद्रां विहारार्द्धपथे गतानां ॥ वातोपि ना
स्रं सयदंशुकानि कोलंबये दाभरणाय हस्तं ॥७५॥ पुत्रो रघुस्तस्य
पदं प्रशास्ति माहाक्रतो विश्वजितः प्रयोक्ता ॥ चतुर्दिगावर्जितसं
भृतां यो मृत्पात्रशेषामकरोद्विभूतिं ॥७६॥ आरूढमद्रीनुदधीन्
वितीर्ण भुजंगमानां वसतिं प्रविष्टं ॥ उर्द्ध्वं गतं यस्य न चानुबंधि य
शः परिच्छेत्तुमियत्तयालं ॥७७॥ असौ कुमारस्तमजोनुजातस्त्रिवि
ष्टपस्येव पतिं जयंतः ॥ गुर्वी धुरं यो भुवनस्य पित्रा धुर्येण दम्यः स

आवर्ज
वित्रम
तिनु

ना

दृष्टीं बिभर्त्ति ॥७८॥ कुलेन कीर्त्या वयसा नवेन गुणैश्च तैस्तैर्विन
यप्रधानैः ॥ च मामनस्कस्य ममर्तु पूर्णो वरस्त्वं समागच्छतु कांच
नेन ॥७९॥ ततः स्मृनें दावचनावसाने लज्जां तनम्रसनरें इ कन्या ॥
दृष्ट्याप्रसादामलया कुमारं प्रसन्नहीत्संवरणस्रजेव ॥८०॥ साय
नितस्मिन्नपि लाघवेन धैर्याच्याकर्षायीनतया नवलकौ ॥ रोमांचवस्
स्तोमेण सगात्रयष्टिं भित्त्वा निरागाम दरोऽलकेश्याः ॥८१॥ तथा
गतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे ॥ आर्ये व्रजा
मोन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥८२॥ सा चूर्णगौ

अगला:कुटिला:३

रोमांचवस्तु ३४

८२

४३

तितलोरणांकं ॥ वरः सवध्वासह राजमार्गंप्राप ध्वजच्छायनिवारितो
ष्णं ॥४॥ ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु
बभूवुरित्थं पुरसुंदरीणां मुक्तान्यकार्याणि विचेष्टितानि ॥५॥
आलोकमार्गं सहसाव्रजंत्या कयाचिदुद्वेष्टनवांतमाल्यः ॥ बद्धुं
न संभावित एव तावच्करेण रुद्धोपि हि केशपाशः ॥६॥ प्रसाधि
कालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ॥ उत्सृष्टलीला
गतिरागवाक्षादलक्तकांकां पदवीं ततान ॥७॥ विलोचनं दक्षि

रामायर्ने गवाक्षोथमं ड्यो स्त्री अनाम्नय. २

णामं ऊनेन सं भाव्यतद्वं चितवामनेत्रा ।। तथैव वातायनसान्निक
र्षिं ययोन्ना ला कामपरा वइंती ।।८।। स्तनंधयं तं नन यांवि हायवि
लोकनाय त्यरयाव्र अंती ।। संप्रस्त नाश्यांपद वीस्त नाश्यांसि
षेयकाचि त्पयसागवासूं ।।९।। डा लांतरप्रेषित दृष्टिरन्या
प्रस्थानचिन्नां नबवंधनी वी ।। नाभिप्रविष्टाभरणप्रभेण
हस्तान तस्थाववलंब्यवासः ।।१०।। अर्द्धाचिता सत्वरमुत्थितायाः
पदेपदेदुर्नमितेग लंती ।। कस्याश्चि दासीद्रशना तदानीम
वस्त्रमात्याद्दर्नवासूर नीवीपरि यणो गांगोस्त्रीणां अयन वास सविष्कः २

तासां मुखेरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां। विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभर ॥ णा इवासन् ॥

गृहद्रुमूलार्पितसूत्र शोभाः ॥११॥ तासां मुखैव दृष्टिभिरपि वहो नाव्यौ
न जग्मुर्विषयांतराणि ॥ तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना
चक्षुरिव प्रविष्टा ॥१२॥ स्थाने वृता भूपतिभिः परोक्षैः स्वयंव
रं साधुममंस्त भोज्या ॥ पद्मेव नारायणमन्यतास्यो लभेत कांतं
कथमात्मतुल्यं ॥१३॥ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्व
मयोजयिष्यत् ॥ अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वि
तथो ...वेप विष्यत् ॥१४॥ रतिस्मरौ नूनमिमावभूतां
तां राज्ञां सहस्रेषु तथा हि बाला ॥ गतेयमात्मप्रतिरूपमेव मनो हि

जन्मांतर संगतिज्ञः ॥१५॥ इत्युक्तनाःपौरवधूमुखेभ्यः श्रृण्वन्कथाः
श्रोत्रसुखाः कुमारः ॥ उद्भासितं मंगलसंविधाभिः संबंधिनः
सद्मसमाससाद ॥१७॥ कुलकं ॥ ततोवतीर्याशुकरेणुकायाः स
कामरूपेश्वरदत्तहस्तः ॥ वैदर्भनिर्दिष्टमथोविवेश नारीमनां
सीवचतुष्कमंतः ॥१८॥ तत्रार्चितो भोजपतेः पुरोधाहुत्वाग्नि
माज्यादिभिरग्निकल्पः ॥ तमेवचाधायविवाहसाक्ष्ये वधूवरौसं
गमयांचकार ॥१९॥ माहाहेसिंहासनसंस्थितो सौसरत्नम

र्घ्यं मधुमच्च गव्यं ॥ घोजोपनीतं च दुकूलयुग्मं जग्राह सार्द्धं
वनिताकटाक्षैः ॥७०॥ दुकूलवासाः स वधूसमीपं निन्ये वि
नीतैरवरोधदक्षैः ॥ वेलासकाशं स्फुटफेनराजिर्नवैरु
दन्वानिव चंद्रपादैः ॥७१॥ हस्तेन हस्तं परिगृह्य वध्वाः स राज
सूनुः सुतरां बभासे ॥ अनंतराशोकलताप्रवालं प्राप्येव चूतः
प्रतिपल्लवेन ॥७२॥ आसीद्वरः कंटकितप्रकोष्ठः स्विन्नांगुलिः
संववृते कुमारी ॥ तस्मिन्द्वयेत [illegible] णमा मवृत्तिः समंविभक्ता

वमनोभवेन ॥५३॥ तयोरुपांतप्रति सारितानि क्रियासमापत्तिनिव
र्तितानि ॥ ह्रीयंत्रणामानशिरेमनोज्ञामन्यान्यलोलानि विलोचना
नि ॥५४॥ प्रदक्षिणप्रक्रमणाकृशानोरुदर्चिषस्तान्मिथुनंचका
से ॥ मेरोरुपांतेष्विववर्त्तमानमन्यान्यसंसक्तमहस्त्रियामं ॥५५॥
नितंबगुर्वीगुरुणाप्रयुक्तावधूर्विधानप्रतिमेनतेन ॥ चकार
सामत्तचकोरनेत्रालज्जावतीलाजविसर्गमग्नौ ॥५६॥ हविः
शमीपल्लवलाजगंधिः पुण्यः कृशानोरुदियायधूमः ॥ कपोल
संसर्पिशिखः सतस्यामुहूर्त्तकर्णोत्पलतांप्रपेदे ॥५७॥ तदंजनक्ले

पुरन्ध्रीसुव रित्रा।।३.

दसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं ।। वधूमुखं पाटलगंड
लेखमाचारधूमग्रहणाद्बभूव ।।२८।। तौ स्नातकैर्बंधुमता च रा
ज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तं ।। कन्याकुमारौ कनकासनस्थावा
र्द्राक्षतारोपणमन्वभूतां ।।२९।। इति स्वसुर्भोजकुलप्रदीपः संपा
द्य पाणिग्रहणं स राजा ।। महीपतीनां पृथगर्हणार्थं समादिदेशा
धिकृतानधिश्रीः ।।३०।। लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्र
सन्ना इव गूढनक्राः ।। वैदर्भमामंत्र्य ययुस्तदीयां प्रत्यर्प्य पूजा

आमिषं चित्रितं श्रोत्रं आमिषं भोग्यवस्तुनि इति केशवः ॥ २
पुंवी॰

मुपदाछलेन ॥ ३१ ॥ सराऊ लोकः कृतसंविदारंभ सिद्धो सम
रैकलभ्यं ॥ आदास्यमानः प्रमद्रां मिषं तदा दृस्यपथा नेम ऊस्य
तस्यो ॥ ३५ ॥ पत्नी पिता च कृत्य केशिकोनाम नुष्ठितानंतर ड्रा
हरपा४ विवाहः ॥ स चानुरूपा पूरणी कृतश्रीः प्रास्थापयद्वाघ चद
गाच्च ॥ ३३ ॥ तिस्त्र स्त्रि लोकी प्रार्थितेन सार्द्धं मऊ नभागो वस
५१ ती रुषिचा ॥ तस्मा दपावर्त्तन कुडिनेशः पर्वो प्रयेसोम इवोष्ण
रस्मेः ॥ ३४ ॥ प्रमन्य वः प्रागपि कोशलेन्द्र प्रत्येकमात्तस्य तयाब
८ ह्रचुः ॥ अतोन्नपास्य क्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मऊस्य ॥ ३५ ॥
८१

नमुद्दहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः ॥ बलिप्रदिष्टं
प्रियमाददानां त्रैविक्रमं पादमिवेन्द्रशत्रुः ॥३६॥ तस्याः स रक्षार्थ
मल्पयोधमादिष्टवान् पित्र्यं सचिवं कुमारः ॥ प्रत्यग्रहीत्पार्थिववा
हिनीं तां भागीरथीं शोण इवोत्तरंगः ॥३७॥ पत्तिः पदातिं रथिनं
रथेशस्तुरंगसादी तुरगाधिरूढम् ॥ यन्ता गजस्याभ्यपतद्गज
स्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥३८॥ नदत्सु तूर्येष्वविभाव्यवा
चो नोदीरयन्ति स्म कुलोपदेशान् ॥ बाणाक्षरैरेव परस्परस्य

ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः ॥ ३

नामोङ्कितं चापभृतः शरास्तुः ॥३९॥ उत्थापितः संयति रेणुरश्वैः सां
द्रीकृतः स्यंदनवंशचक्रैः ॥ विस्तारितः कुंजरकर्णतालैर्नेत्रक्रमेणोप
रुरोध सूर्यं ॥४०॥ मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजि
नीरजांसि ॥ बभुः पिबंतः परमार्थमत्स्याः पर्याविलानीव नवोदका
नि ॥४१॥ रथो रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः ।
५८ स्वभर्त्तृनामग्रहणाद्बभूव सांद्रे रजस्यात्मपरावबोधः ॥४२॥
आवृण्वतो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य ॥ शा ५८

वरूथो वर्मणो कुले वर्गपृष्ठः स्यावयवेपि च ॥ ६

५८

स्व स ता श्च च्छि प वीर ऽन्मा बाक्का स्तो ष्ठ रुधिर प्रवाहः ॥४३॥ संछि
न्नमूलक्ष तजेन रेणु स्तस्यापरिष्टात्पवनाव धूतः ॥ अंगारकोप
स्य हुता शनस्य पूर्वोत्थितो धूम इवावभासे ॥४४॥ प्रहारमूर्च्छा
पगमे रथस्थाः यंतॄ नुपालभ्य निवर्त्तिताश्वान् ॥ यैः सादिता लक्षि
तपूर्वकेतुं स्तानेव सामर्षतया निजघ्नुः ॥४५॥ अप्यर्ध मार्गे परबा
णलूना धनुर्भृतां हस्तवतां पृषत्काः ॥ संप्रापुरेवात्म जवानुवृत्त्या
पूर्वार्धभागैः फलिभिः शरत्वं ॥४६॥ शिली मुखोत्कृत्तशिरः फ
लाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ॥ रणक्षितिः शोणितमद्य कुल्या कुल्या

...च्छ ऽयापीनाम्न चरितं तल्पकूलिव भमरं तदुते ॥३ ...न्तनिनास
मिता ॥१

रसाङ्कमसोरिवपानमर्हन्ति ॥४७॥ पूर्वं प्रहर्त्ता न जघान भूयः प्रतिप्रहा
राक्षममश्वसादी ॥ तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाच
कांक्ष ॥४८॥ तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः ॥ स्वड्ग
उद्यंतमग्निं शमयांबभूवुर्गजा विवि[illegible]ः करसीकरेण ॥४९॥ उपां
तयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि ॥ केयूरको
टिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ॥५०॥ कश्चिद्द्विषत्खड्
गहृतोत्तमांगः सद्यो विमानप्रभुतामुपेत्य ॥ वामांगसंसक्तसुरां
गनः स्वं नृत्यत्कबंधं समरे ददर्श ॥५१॥ अन्योन्यसूतोन्मथनाद

आघोरवानागजासन्निपाते । शिरांसि च ... नखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ॥

तां तावेवस्ततौ रथिनौ चक्कौ वित्॥ व्यश्चैगदाव्यायतसंग्रहारौक्ष
ग्नापुयौबाहुविमर्द्दनिष्ठौ॥५२॥परस्परेणाक्षतयोः प्रहारैरुत्क्रांत
वाय्वोः समकालमेव॥ अमर्त्यभावेपिकयोश्चिदासीदेकाप्सर
सा प्रार्थितयोर्विवादः॥५३॥ व्यूढाबुभौतावितरेतरस्माद्भुगंडर्भ
प्रापतुरव्यवस्थं॥ पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्तैवमहा
र्णवोर्मी॥५४॥परेणभग्नेपिबलेमहौजा ययावजः प्रत्यरिसैन्य
मेव॥ धूमोनिवर्त्यैत समीरणेन यतोहि कक्षस्तत एव वह्निः॥
॥५५॥रथीनिषंगीकवचीधनुष्मान् दृप्तः सराजन्यकमेकवीरः॥

विलोडयामास महाहवशाहः कल्पक्षये द्रुमि नार्णवौघः ॥५६॥ सद
क्षणं क्षणमुरवेन वाम व्यापारयन्नस्य समस्तमल्लसन्ताडौ ॥ आकर्णकृष्टा
सकृद् दस्ययोधू मौर्वीविबाणान्सुषुवे रिपुघ्नान् ॥५७॥ सरोषदष्टो
50 ष्ठाविलोहिता सैः व्यक्रोर्ध्वरेखाञ्चकुटीविहाद्धिः ॥ नः स्तारगांमल्लनि
कृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ॥५८॥ सर्वैर्बलांगैर्द्विरद
प्रयानैः स बोधुधैः कंकटभेदि तिष्ठा ॥ सर्वप्रयत्नेन च पक्षमि
पाव्यास्मास्मिन्प्रउद्धर्युधि सर्वरव ॥५९॥ सोस्त्रवृद्धेच्छन्न रथः

५० ५०

परेषां ध्यानमात्रेणवाध्यवल्लभ्यः॥ नीहारमग्नोदिनपूर्व
भागः किंचित्प्रकाशोनविवस्वतेव॥६०॥ प्रियंवदात्प्राप्तमथोकु
मारः प्रायुंक्तराजस्यधिराजसूनुः॥ गांधर्वमस्त्रंकुसुमास्त्र
कांतः प्रस्वापनंस्वप्ननिवृत्तलौल्यः॥६१॥ ततोयनुःकर्षणमूढ
हस्तमेकांसपर्यस्तशिरस्त्रजालं॥ तस्थौ ध्वजस्तंभनि
षण्णदेहं निद्राविशेषंनरदेवसैन्यं॥६२॥ ततः प्रियोपात्तरसेध
रोष्ठे निवेश्यदध्मौजलजंकुमारः॥ तेनस्वहस्तार्जितमेक
वीरः पिबन्यशोमूर्तमिवावभासे॥६३॥ शरैस्तस्यनाभिज्ञत

यानिद्रया संनशत्रु ददर्श स्वयोधाः॥ निमीलितानामिव
पंकजानां मध्ये स्फुरंतं प्रतिमाशशांकं॥६४॥ सशोणितैस्तेन
शिलीमुखाग्रै निक्षेपिताः केतुषु पार्थिवानां॥ यशो हृतं संप्रति राघ
वेण न जीवितं वः कृपयेति वर्णाः॥६५॥ स चापकोटौ निहितैकबाहुः
5) शिरस्त्रनिष्कर्षणभिन्नमौलिः॥ ललाटबद्धश्रमवारिबिंदुर्भीतां प्रि
यामेत्य वचो बभाषे॥६६॥ इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानु
मता मयासि॥ एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः
१ ॥६७॥ तस्याः प्रतिद्वंद्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे॥ ५१

५१ पोतः ... कः राशिः॥३

केकामालीमयूरस्वरस्तमरः अभ्रवृन्दं मेघजालं इत्यमरः

निश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ॥६८॥
हृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनन्दत् ॥
स्थली नवाम्भःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृन्दं ॥६९॥
इति शिरसि स वामं पादमाधाय राज्ञामुदवहदनवद्यां तामवद्या
दुपेतः ॥ रथतुरगरजोभिस्तस्य रूक्षालकाग्रा समरविजयलक्ष्मीः
सैवमुक्ता बभूव च ॥७०॥ प्रथममधिगतार्थस्तं रघुः सन्निवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतं ॥ तदुपहितकुटुंबः शांति

कौतुकं विचयाम्भोगे मंगलेः कुलं ह छे॥ विवाहस्य भविख्यामहतंदमनैरयः॥४

मार्गौ स्तु को मृदू हि सानि तु लब्धर्पे स्पर्धेव ज्याग्रहाय॥ ७१॥
इति श्री रघुवंशे महाकाव्ये कालिदासकृतौ स्वीरत्नलाभो नाम स
प्तमः सर्गः॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥
अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः॥ वसुधामपि
हस्तगामिनीमकरोदिंदुमतीमिवापरां॥ १॥ दुरितेरपि कर्तुमात्म
सात्प्रयतं ते नृपस्तनवो हि यत्॥ तदुपस्थितमग्रहीदग्रजः पितुरा
ज्ञेति न भोगतृष्णया॥ २॥ अनुभूय वसिष्ठसंभृतैः सलिलैस्तेन
इति हेलुप्रकरणाप्रकारादिसमाद्रिषु॥ १॥

हिरवधारणो हिर्ई तावववधारवो

न सहाभिषेचनं ।। विषदोछ्वसितेन मेदिनी कथयामास कृतार्थता
मिव ।।३।। स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः ।। प
वनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ।।४।। रघुमेव
निवृत्तयौवनं तममन्यंत नरेश्वरं प्रजाः ।। स हि तस्य न केवलां
श्रियं प्रतिपेदे सकलान्गुणानपि ।।५।। अधिकं शुशुभे शुभंयु
ना द्वितयेन द्वयमेव संगतं ।। पदमृद्धमजेन पैतृकं विनयेनास्य
नवं च यौवनं ।।६।। सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति ।।

प्रकृतिः पंचस्तंभेषु स्वभावेष्व का रणे ॥ छंदः कारणाः अहेषु अंचमासादि ... मात्यषु प्रतिबंधजाः

अचिरोपनतां समेदिनीं नवपाणिग्रहणां वधूमिव ॥७॥ अहमेव मतो म
हीपतेरिति सर्वः प्रकृतिष्वचिंतयत् ॥ उदधेरिव निम्नगाशतेष्वभव
न्नास्य विमानना क्वचित् ॥८॥ न खरो न च भूयसा मृदुः पवमानः पृथि
वीरुहानिव । स पुरस्कृतमध्यमक्रमो नमयामास नृपाननंतरान् ॥९॥
अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया । विषयेषु विना
शधर्मिषु त्रिदिवस्थेष्वपि निस्पृहोऽभवत् ॥१०॥ गुणवत्सुतरोपितश्रि
यः परिणामे हि दिलीपवंशजाः । पदवीं तरुवल्कवाससां प्रयताः संय
मिनां प्रपेदिरे ॥११॥ तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः

विश्रामोको निवसर्ग स्थानावसथवेश्म स्युरित्यमरः ॥ २

पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥ १२ ॥ रघुरश्रुमुखस्यतस्य तत्कृतवानीप्सितमात्मजप्रियः ॥ ननु सर्प्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियं ॥ १३ ॥ स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः ॥ समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥ १४ ॥ प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरं ॥ नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥ १५ ॥ यतिपार्थिवलिंगधारिणौ ददृशाते रघुराघवौ जनैः ॥ अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ ॥ १६ ॥ अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशारदैरजः ॥

निभृतेन्दुना अयः ॥ १

निःनु चरति

प्रकृतौ प्रोज्झवयास्य विरोऽरन्दृश्मौ धामाचिंतामणिः २
प्रैष्य व्यतस्तपतिर्युवा नचिवैः प्रसहसमर्थसिद्धये॥ अपद्मनोऽनेनोपपन्नयोऽवयाः संयामि शिर्मनीषिभिः॥२॥

अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः॥१७॥ नृप
तिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा॥ परिचेतुमुपांशु धा
रणां कुशपूतं प्रवयास्तु विष्टरं॥१८॥ अनयत्प्रभुशक्तिसंपदा वश
मेको नृपतीननंतरान्॥ अपरः प्रणिधानयोग्यया मरुतः पंचशरी
रगोचरान्॥१९॥ नयचक्षुरजो दिदृक्षया पररंध्रं ध्रुस्यततान मंडले॥ असजत्
हृदये समरोपयन्मनः परमं ज्योतिरवेक्षितुं रघुः॥२०॥ अकरो
दचिरेश्वरः क्षितौ द्विषतारंभफलानि भस्मसात्॥ इतरो दहने

प्रणिधानं समाधिः तत्र यायोग्यादभ्यासः॥४

54

५५

पणो व्यवहारो बध्यतेऽस्मिन्निति पणबंधः संधिः स मुखमादिर्येषां ते पणबंधमुखास्तान् संधिविग्रह
यानासनद्वैधीभावसंश्रयाभिधानान् षड्गुणान् ।।

स्वकर्मपर्णी वदृते ध्यानमयेन वह्निना ।। २०।। पणबंधमुखान् गुणान
जः षडुपायुंक्त समीक्ष्य तत्फलं ।। रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं स
मलोष्ठकांचनः ।।२१।। न नवः प्रभुराफलोदयात् स्थिरकर्मा विरराम
कर्मणः ।। न च योगविधेर्नवेतरः स्थिरधीरापरमात्मदर्शनात् ।।
।।२२।। इतिशत्रुषु चेंद्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।। प्रसितावुद जासितौ
यापवर्गयोरुभयीं सिद्धिमुभाववापतुः ।। २३।। अथ कांचिदजव्यपे
क्षया गमयित्वा समदर्शनः समाः ।। तमसः परमापदव्ययं पुरुषं यो

तमसोपरं अविद्यायाः परं आत्मनीत ।।

विदधे विधिमस्य नैष्ठिकं यतिभिः सार्द्ध मनग्निमग्निचित् ॥ पं० २ ॥
योगसमाधिना ब्रम्ह विषयेण इति ज्ञानेन ॥२५॥

ग समाधिना रघुः ॥२५॥ श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य रा
घवः ॥ विदधे ... ॥ अक
रोत्स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् ॥ न हि तेन पथा
तनुत्यजस्तनयावर्जितपिंडकांक्षिणः ॥२७॥ स परार्ध्यगतेरशोच्य
तां पितुरुद्दिश्य सदर्थवेदिभिः ॥ शमिताधिरधिज्यकार्मुकः कृ
तवानप्रतिशासनं जगत् ॥२८॥ क्षितिरिंदुमती च भामिनी पतिमासा
द्य तमग्र्यपौरुषं ॥ प्रथमा बहुरत्नसूरभूदपरा वीरमजीजनत्सुतं ॥२९॥

शासनं राजदत्तोर्वी लेख्याज्ञाशास्त्रशासिते पुरुषे इति विश्वः ॥२

दक्षार[illegible] शिमिशातोपमद्युतिं यत्रासादि दृक्षु दक्षास्य पिशृतं ॥ दक्षाप्सर्वेर
पं समारव्ययादक्षाद्धं गरिगुरुं विदुर्बुधाः ॥३०॥ युग्मं ॥ ऋषिदेवग
णास्ययाम्बुजोऽभूत् तयागत्रसवैः सपार्थि[illegible]वः ॥ अनेन च मुपेपि
वानूवर्षोपरि धर्मैर्युक्तइवोष्णादीधितिः ॥३१॥ वृक्षमार्तण्डयोपश्चा ॥
तयोर्विदुषां सनतयेव हृष्टतं ॥ वस्तुतस्य विष्णोर्न केवलं गुणावत्ता
पिपरत्रयोऽनं ॥३२॥ सकदाचिद्दवोहितपदः सह देव्या विहा
रस्पृहः ॥ वनरोपवनश्रावीसरवो मरुतोपाव्यपितो वनं दन ॥३३॥
अथरोधसि दाक्षिणोदधेः क्षितिगोकर्णनिकेतमीश्वरः ॥ उपवीण

चियितुं ययौ रवेरुदयावृत्तिपथेन नारदः ॥३४॥ कुसुमैर्ग्रथितामपार्थिवैः
स्रजमातोद्यशिरोनिवेशितां ॥ अहरत्किल तस्य वेगवानधिवासस्पृ
हयेव मारुतः ॥३५॥ भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादि
नी मुनेः ॥ ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलं ॥
॥३६॥ अभिभूय विभूतिमार्त्तवीं मधुगंधातिशयेन वीरुधां ॥ नृ
56 पतेरमरस्रगाप सा दयितोरस्तनकोटिसंस्थितिं ॥३७॥ क्षणमा
त्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ॥ निमिमील न
रोत्तमप्रिया हृतचंद्रा तमसेव कौमुदी ॥३८॥ पुनरप्रतिबोधलब्धये

श्री

निमिर्मा क्ष्मित्रिपाल सुंदरी ॥२७॥ समममेयनराधिपेन स्याकुरसं
मोहादिक्षुप्रयेतसा ॥ अगमस्सहते क्षबिंदुनानवदीपार्विरिवर्द्धि
तेस्तक्षं ॥ नृपयोरिवपार्श्ववर्त्तिनां तुमुखेनान्तरिबपावेडिताः ॥ वि
हगाक्रमक्षाकराश्रयाः समदुःखाइवतन्नचुक्रुशुः ॥४१॥ नृ
पतेर्व्यजनादिभिस्तमोनुनुदे सावृतयैवसंस्थिता ॥ प्रतिकाराविधा
नमायुषः सतिशेषेहिफलायकल्पते ॥४२॥ प्रतियोजयितव्यवल्ल
कीसमरवस्थमथसत्वविक्रवात् ॥ सनिनायनितांतवत्सलः परि

द्यो चित मंगमंगा तां ॥४३॥ पतिरंक निषण्ण यातया करुणा पायचिंत्ति
न्न वर्णया ॥ प्रम लस ताबेक्ष दावि क्षौं मृगशावाक्ष्यामुषसीव यंद्रेम॥
॥४४॥ विष्क लापस बाष्पागद्गद सह ङ्ग मप्यप हायधीरतां अभि तत्त
मयोपि माहूर्वभङ्ग तेकैव कथा न्नारी रिषु ॥४५॥ कुसुमान्यपिगा
द्वि५ त्र सं गमात् प्रभवं त्या धुरपो हितुर्ये ॥ न भविष्यति हंति साधनं कि
मिवान्य त्प्रकृ विध्य तो विधेः ॥४६॥ अथवा मृदुवस्तु हिंसितुं मृदुने
वार भते प्रजां तकः ॥ हिमसेक विपत्तिर त्रमे नलिनीपूर्व निदर्शनं गता
॥४७॥ स्रगियं यदि जीवितापहा हृदये किं निहिता न हंति मां ॥ विषमप्यमृतं
४७ ४७

नाचिषमीश्वरेछया ॥४८॥ अथवामममभाग्यविक्रवादशनिःकाल्पितएषवे
धसा ॥ मदनेननपातितस्तरोसपिवानहितटपाश्रिताकता ॥४९॥ कृतव
सन्निबावधीरणामपराधेपियदाचिरंमयि ॥ कथमेकपदेनिरागसंज
नमाभाष्यमिमंनमन्यसे ॥५०॥ ध्रुवमस्मि [illegible] शठः स्मुचिस्मिते
विदितः केतववत्सलस्तव ॥ परलोकवसन्निदन्नयेयदनाप्रच्छयगता
स्मिमामितः ॥५१॥ दयितांयदितावदन्वगाद्विनिवृत्तंकिमिदंतयाविना ॥
सहतांहतजीवितंममप्रबलामात्मकृतान्ववेदनां ॥५२॥ स्मरतन्यमसंस्मृतो
मुखेवध्रियतस्वेदलवाद्गमोपिते ॥ अथवासमितान्नमामन्नाछितिमाद

हवतामस्मारतां ॥५३॥ मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि
मां ॥ ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबंधना रतिः ॥५४॥ कुसुमो
त्कचितान्वलीभृतश्चलयन्भृंगरुचस्तवालकान् ॥ करभोरु करोति मा
रुतस्त्वदुपावर्त्तनशंकि मे मनः ॥५५॥ तदपोहितुमर्हसि प्रिये प्रतिबोधेन
विषादमाशु मे ॥ ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधी
58 ॥५६॥ इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति मां ॥ निशि सुप्त
मिवैकपंकजं विरताभ्यंतरलीनषट्पदं ॥५७॥ शशिनं पुनरेति शर्वरी दयि
ता द्वंद्वचरं पतत्रिणं ॥ इति तौ विरहांतरक्षमौ कथमत्यंतगता न मां दहेः ॥५८॥

नवपल्लवसंस्तरेपितेमृदुदूयेतयदंगमर्पितं ॥ तदिदं विषहिष्यतेकथंव
दवामोरुचिताधिरोहणं ॥५९॥ इयमप्रतिबोधशायिनीं रशनात्वांप्रथ
मारहःसखी ॥ गतिविभ्रमसादनीरवानशुचानानुमृतेवलक्ष्यते ॥६०॥
कलमन्यभृतासुभाषितंकलहंसीषुगतंमदालसं ॥ पृषतीषुविलोल
मीक्षितंपवनाधूतलतासुविभ्रमाः ॥६१॥ त्रिदिवोत्सुकयाप्यवेक्ष्यमां
निहिताःसत्यममीगुणास्त्वयाविरहेतवमेगुरुव्यथंहृदयंनत्वव
लंबितुंक्षमाः ॥६२॥ मिथुनंपरिकल्पितंत्वयासहकारःफ
लिनीवनन्विमौ ॥ अविधायविवाहसत्क्रियामनयोर्गम्यतइत्यसां

प्रती ॥६३॥ कुसुमे कृतदोहदस्त्वया यदशोकोयमुदीरयिष्यति ॥ अ
लकाभरणं कथं न तत्तव नेष्यामि निवापमाल्यतां ॥६४॥ स्मरतेव स
शब्दनूपुरं चरणानुग्रहमन्यदुर्लभं ॥ अमुना कुसुमास्रुवर्षि
णा त्वमशोकेन सुगात्रि शोच्यते ॥६५॥ तव निश्वसितानुवादिभि
र्बकुलैरर्द्धचितां समं मया ॥ असमाप्य विलासमेखलां किमिदं
59 किंनरकण्ठि सुप्यसे ॥६६॥ समदुःखसुखः सखीजनः प्रतिपच्चं
द्रनिभोयमात्मजः ॥ अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः
॥६७॥ धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ॥ गतमा स

५८

श्री

स्वाग्रयोऽजनि परिरंभव्यंजनीयमस्य मे ॥६८॥ गृहिणी सचिवः सखी मि-
थः प्रियशिष्या ललिते कलाविधौ ॥ करुणाविमुखेन मृत्युना हरता
त्वां वद किं न मे हृतं ॥६९॥ तमिराक्षि मदानलार्पितं मधुपीत्वा रस-
वत्कथं नु मे ॥ अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलांजलिं ॥
॥७०॥ विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यतां ॥ अहृतस्य विलोभ-
नांतरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥७१॥ विलपन्निति कोशलाधिपः क-
रुणार्थग्रथितं प्रियां प्रति ॥ अकरोत्पृथिवीरुहानपि स्रुतशाखारसबा-
ष्पदूषितान् ॥७२॥ अथ तस्य कथंचिदंकतः स्वजनस्तामपनीय सुंदरीं ॥
विससर्ज तदंत्यमंडनामनलायागुरुचंदनैधसे ॥७३॥ प्रमदामनुसंस्थि-

तः मुखाद्वितिपः सन्निवाच्यदर्शनात् ॥ नचकारशरीरमग्निसात्सहदेव्यानतु
जीविताशया ॥७४॥ अथ ते नदर्शनाहतः परं गुणाशेषामपि मपिदं श्यसुंदरी ॥
विदुषाविधयोमहर्द्धयः पुरएवोपवने वितेनिरे ॥७५॥ सविशेषपुरंस्तयावि
नाक्षणादापायदर्शनो कदर्शिनः ॥ परिवाहमिवावलोकयन्स्वभुवः पौरवधू
मुखाम्बुजं ॥७६॥ तमवेक्ष्य मखायदीक्षितः प्रणिधानाद्गुरुराश्रमाश्रितः ॥
अभिषिंगिरामी श्वरं विशामि शिष्यवपोकि व्यान्चबोधयत् ॥७७॥ अथसमा
प्तेविधियेतोमुनिस्तवजानंनपि नापकारणं ॥ नभवंतमुपास्थितः स्वयंप्र
कृतौस्थापयितुं कृतस्थितिः ॥७८॥ मयितस्यसुवृत्तवर्त्तने स्फुटसंदेश
पदासरस्वती ॥ अ[illegible]पुविभ्रतसत्वसारतीहृदियेनाभवद्यातुमर्हसि ॥७९॥

पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भाविच । स हि निःप्रतिघेन चक्षुषा
त्रितयं ज्ञानमयेन पश्यति ॥८०॥ चरतः किल दुश्चरं तपस्तृणबिंदोः परि
शंकितः पुरा । प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुरांगना ॥८१॥
स तपःप्रतिबंधमन्युना प्रमुखाविष्कृतसाचिविभ्रमां । अशापद्भवमा
नुषीति तां शमवेलाप्रलयोर्मिणा मुनिः ॥८२॥ भगवन्परवानयं जनः
प्रतिकूलाचरितं क्षमस्व मे । इति चोपनतां क्षितिस्पृशं कृतवाना सु
रपुष्पदर्शनात् ॥८३॥ क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चि
राय सा । उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणं ॥८४॥

नीरूव

तदलं नरपाववचिं तया विपदुत्पत्ति मतीसवास्थिता ॥ वसुधेप मवेक्ष्य तं स्वयाव
वसुमसाहि नृपाः कच्छत्रिण ॥८५॥ तुँदयेय द वाप्यमुपसितान्म तमाविष्ट
तमालमत्यया ॥ मनसस्तादुपस्थिते ज्वरे पुमर क्लीब नयात्रकाइयती ॥८६॥
रदताकुतए वसापुनर्भवता नानानुमृते न लभ्यते ॥ परलोककुर्वांस्वकर्मणि
गेतयोर्भिन्नपथाहि देहिनां ॥८७॥ अपच्योकमनाः कुटुंबिनीमनुगन्तुं
स्वनिवापदानषिः ॥ स्वजनाश्रु किकाति संचितं दहतिप्रे तमिवन्नचक्षते ॥
॥८८॥ मत्पांत्रकृतिः शापीरिणां विकृतिर्जी वितमुच्यते कुपैः ॥ क्षणमप्यवतिष्ठ
तेश्वसन्यदिते तेन मुक्कामसौ ॥८९॥ अवगच्छति मूढचेतनः प्रियनां
शंहृदि शल्यमर्पितं ॥ स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतं ॥९०॥
स्थिरधीस्तु तदेव

श्री नरेंसचेन ॥८४॥ इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमंतुं ॥ आ
त्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव पादयो स्ते ॥८५॥ इत्यूचिवानुपहृता
भरणं क्षितीशं श्लाघ्यो भवान् स्वजन इत्यनुभाषितारं ॥ संयोजयां विधिवदास स
मेतबंधुः कन्यामयेन कुमुदः कुलभूषणेन ॥८६॥ तस्याः स्पृष्टे मनुजपतिना सा
हचर्याय हस्ते मांगल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य ॥ दिव्यस्तूर्यध्वनि
रुदचरद्व्यश्नुवानो दिगंतान् गंधोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः ॥८७॥ इत्थं
नागस्त्रिभुवनगुरोरौरसं मैथिलेयं लब्ध्वा बंधुं तमपि च कुशः पंचमं तक्षकस्य ॥
एकः शंकां पितृवधरिपोरत्यजद्वैनतेयाच्छांतव्यालामवनिमपरः पौरकांतः शशा
स ॥८८॥ छ॥ छ॥ छ॥ ॥ इति रघुवंशे महाकाव्ये श्रीकालिदासकृतौ कुमुद्व

तीपरिणयनो नाम षोडशः सर्गः ॥ १६ ॥ अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती ।
पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥१॥ स पितुः पितृमान्वंशं मातुश्चा
नुपमद्युतिः ॥ अपुनात्सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥२॥ तमादौ कुलविद्या
नामर्थमर्थविदां वरः । पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता ॥३॥ जात्यस्
तेनाभिजातेन शूरः शौर्यवतां वरः ॥ अमन्यतैकमात्मानमनेकं वशिना व
शी ॥४॥ स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् ॥ जघान समरे दैत्यं मही
शस्तेन चावधि ॥५॥ तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ॥ अन्वगात्कुमु
दानन्दं शशाङ्कमिव कौमुदी ॥६॥ तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ॥

द्वितीयापि सरवी त्रास्याः पारिजातांसभागिनी ॥ ७॥ तदात्मसंभवं राज्ये
मंत्रिवृद्धाः समादधुः ॥ स्मरंतः पश्चिमामज्ञां भर्तुः संग्रामयायिनः ॥ ८॥
ततस्ते कल्पयामासुरभिषेकाय शिल्पिभिः ॥ विमानं नवमुद्वेदि चतुस्तंभप्र
तिष्ठितं ॥ ९॥ तत्रैनं हैमकुंभेषु संभृतैस्तीर्थवारिभिः ॥ उपतस्थुः प्रकृतयो
भद्रपीठनिवेशिनं ॥ १०॥ नदद्भिः स्निग्धगंभीरं तूर्यैराहतपुष्करैः ॥ अन्वमी
यत कल्याणं तस्याविच्छिन्नसंतति ॥ ११॥ दूर्वांकुरप्लक्षत्वगभिन्नपुरोत्त यवां
रान् ॥ इति वृद्धप्रयुक्तान् स पश्चेऊ नीराजनाविधीन् ॥ १२॥ पुरोहितपुरोगास्तं
जिष्णुं जैत्रैरथर्वभिः ॥ उपचक्रमिरे पूर्वमभिषेक्तुं द्विजान्मलमाः ॥ १३॥

त स्योच्चमहतीमूर्ध्नि निपतंती व्यरोचत॥ सशब्दमभिषेक श्रीर्गंगेवात्रिपुरद्विषः॥
॥१४॥ स्तूयमानः क्षणेतस्मिन्नलक्ष्यत स बंदिभिः॥ प्रवृद्ध इव पर्जन्यः सा
रंगैरभिनंदितः॥१५॥ तस्य सन्मंत्रपूताभिः स्नानमद्भिः प्रतीच्छतः॥ ववृधे वै
द्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः॥१६॥ स तावदभिषेकांते स्नातकेभ्यो ददौ
वसु॥ यावत्तेषां समाप्येरन्यज्ञाः पर्याप्तदक्षिणाः॥१७॥ ते प्रीतमनसस्तस्मै या
माशिषमुदीरयन्॥ सा तस्य कर्मनिर्वृत्तैः दूरं पश्चात्कृता फलैः॥१८॥ बंध
च्छेदं स बद्धानां वधार्हाणामवध्यतां॥ धुर्याणां च धुरो मोक्षमदोहं चादिशद्ग
वां॥१९॥ क्रीडापतत्रिणोप्यस्य पंजरस्थाः शुकादयः॥ लब्धमोक्षास्तदादेशाद्य
थेष्टगतयोऽभवन्॥२०॥ ततः कक्षांतरन्यस्तं गजदंतासनं शुचि॥ सोत्तरच्छदमध्या

स्नातं नेपथ्यग्रहणाय स्नः ॥२१॥ तं धूपाश्यानकेशांतं तोयनिर्णिक्तपाणयः ॥ आक
ल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥२२॥ तेस्य मुक्तागुणानद्धं मौलिमन्तर्गतन
स्रजं ॥ प्रत्यूपुः पद्मरागेण प्रभामंडलशोभिना ॥ चंदनेनांगरागं च मृगनाभि
सुगंधिना ॥ समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनं ॥२४॥ आमुक्ताभरणः स्रग्वी
हंसचिह्नदुकूलवान् ॥ आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥२५॥ नेपथ्यद
र्शिनश्छाया तस्यादर्शे हिरण्मये ॥ विरराजन वेसूर्ये मेरौ कल्पतरोरिव ॥२६॥ स रा
जककुदव्यग्रपाणिभिः पार्श्ववर्तिभिः ॥ ययावुदीरितालोकः सुधर्मानवमां सभां
॥२७॥ वितानसहितं तत्र भेजे पैतृकमासनं ॥ चूडामणिभिरुद्धृष्टपादपीठं महीक्षि
तां ॥२८॥ बभौ भूयः कुमारत्वादधिराज्यमवाप्य सः ॥ लेखावभासावाडुपारूढः सा

मग्यमिव चंद्रमाः ॥२८॥ शुशुभेतेन चाक्रांतं मंगलायतनं महत् ॥ श्रीवत्सलक्षणं व
क्षः कौस्तुभेनेव केशवं ॥३०॥ प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणं ॥ मूर्त्ति
मंतममन्यंत विश्वासमनुजीविनः ॥३१॥ स पुरं पुरुहूतश्रीः कल्पद्रुमनिभध्व
जं ॥ क्रममाणश्चकार द्यां नागेनैरावतौजसा ॥३२॥ तस्यैकस्योच्छ्रितं छत्रं मूर्द्धि
नेनामलत्विषा ॥ पूर्वराजवियोगौष्ण्यं कृत्स्नस्य जगतो हृतं ॥३३॥ धूमादग्नेः
शिखाः पश्चादुदयादंशवो रवेः ॥ सोतीत्य तेजसो वृत्तिं सममेवोत्थितो गुणैः ॥३४॥
तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ॥ शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य इवोडुपं ॥ सि
॥३५॥ अयोध्यादेवताश्चैनं प्रशस्तायतनार्च्चिताः ॥ अनुदध्युरनुध्येयं सांनिध्यैः
प्रतिमागतैः ॥३६॥ यावन्नाश्यायते वेदिरभिषेकजलाप्लुता ॥ तावदेवास्य वेलां १२८

८७ १७५ १२३

तेप्र तापः श्वापदुःसहः ॥३७॥ वसिष्ठस्य गुरोर्मंत्राः सायकास्तस्य धन्विनः ॥ किं
तत्साध्यं यदुभये साधयेयुर्न संगताः ॥३८॥ स धर्मसखः शश्वदर्थिप्रत्यर्थि
नां स्वयं ॥ ददर्श संशयच्छेद्यान्व्यवहारानतंद्रितः ॥३९॥ ततः परमभिव्यक्त
सौमनस्यनिवेदितैः ॥ युयोज पाकाभिमुखैर्भृत्यान्विज्ञापनाफलैः ॥४०॥ प्रजास्त
द्गुरुणा नद्यो नभसेव विवर्द्धिताः ॥ तस्मिंस्तु भूयसीं वृद्धिं नभस्ये ता विशायथो ॥
इवाययुः ॥४१॥ यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् ॥ सोऽभूद्भग्नव्रतः शत्रूनुद्धृ
त्य प्रतिरोपयन् ॥४२॥ वयोरूपविभूतीनामेकैकं मदकारणं ॥ तानि तस्मिन्समस्ता
नि नैवास्योत्सिषिचुर्मनः ॥४३॥ इत्थं जनितरागासु प्रकृतिष्वनुवासरं ॥ अक्षोभ्यः स
नवोऽप्यासीद्दृढमूलइव द्रुमः ॥४४॥ अनित्याः शत्रवो बाह्याः विप्रकृष्टाश्च ते सदा ॥

अतः सोभ्यंतरान्नित्यान्षट् पूर्वमजयद्रिपून्॥४५॥प्रसादाभिमुखे तस्मिंश्चपलापि
स्वभावतः॥ निकषे हेमलेखेव श्रीरासीदनपायिनी॥४६॥ कातर्ये केवला नीतिः शौ
र्ये श्वापदचेष्टितं॥ अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः॥४७॥ न तस्य मंडले
राज्ञो न्यस्तप्रणिधिदीधितेः॥ अदृष्टमभवत्किंचिद्व्यभ्रस्येव विवस्वतः॥४८॥ रात्रिं
दिवविभागेषु यदादिष्टं महीक्षितां॥ तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः॥
॥४९॥ मंत्रः प्रतिदिनं तस्य बभूव सह मंत्रिभिः॥ स जातु सेव्यमानोपि गुप्तद्वारो
न सूच्यते॥५०॥ परेषु स्वेषु विक्षिप्तैरविज्ञातपरस्परैः॥ सोपसर्पैर्जजागार यथा
कालं स्वपन्नपि॥५१॥ अव्यमुख्याः समारंभाः प्रणवेशा निरत्ययाः॥ गर्भशालिसध
र्माणस्तस्य गूढं विपेचिरे॥५२॥ अपथेन प्रववृते न जातूपचितोपि सः॥ वृद्धो नदी

मुखेनैव प्रस्थानं कवर्णाभसः ॥५३॥ पित्रा संवर्द्धितो नित्यं कृतास्त्रः सां
परायिकः ॥ तस्य दंडवतो दंडः स्वदेहान्न व्यतिरिच्यते ॥५४॥ दुर्गाणि दु
र्गहाण्या संस्तस्य रोद्धुरपि विद्विषां ॥ न हि सिंहो गजास्कंदी भयाद्गिरि
गुहाशयः ॥५५॥ कामं प्रकृति वैराग्यं सद्यः शमयितुं क्षमः ॥ यस्य का
र्य प्रतीकारः स तन्नैवोपपादयेत् ॥५६॥ शाकोष्ण वाल्लवग्धा त्रात्तस्य श
क्तिमतः सतः ॥ समीरणसाहाय्योपि नांभः प्रार्थी दवानलः ॥५७॥ न धर्म
मर्थकामाभ्यां बाधयन चतेन तो ॥ नार्थ कामेन कामं वा सोर्थेन सदश्रा
स्त्रिषु ॥५८॥ हीनान्यनुपकारीणि प्रवृद्धानि विकुर्वते ॥ तेन मध्यमशक्ती १२५

निमित्तानि स्वच्छापितान्यतः ॥५९॥ परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलं ॥ य
थावरं विशिष्टश्चेत्परस्मादास्त सोन्यथा ॥६०॥ कोशाद्याश्रयणीयत्वमिति तस्या
र्थसंग्रहः ॥ अंबुगर्भो हि जीमूतश्चातकैरभिनंद्यते ॥६१॥ परकर्मापहः सोभूदु
द्यतः स्वेषु कर्मसु ॥ आवृणोदात्मनो रंध्रं रंध्रेषु प्रहरद्विषां ॥६२॥ सर्पस्येव शिरो
रत्नं नास्य शक्ति~~[illegible]~~त्रयं परः ॥ स चकर्ष परस्मात्तदयस्कांत इवायसं ॥६३॥
वापीष्विव स्रवंतीषु केष्विव वनेषूपवनेष्विव ॥ सार्थाः स्वैरं तदीयेषु चेरुर्वेश्मस्वि
वाद्रिषु ॥६४॥ तपोरक्षन्स विघ्नेभ्यस्तस्करेभ्यश्च संपदः ॥ यथास्वमाश्रमैश्चक्रे व
र्णैरपि षडंशभाक् ॥६५॥ खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् ॥ दिदेश वेत

न तस्मै रसास्तद्द्वामेव भ्रुः॥ ६६॥ सगुणानां बलानां च षण्णां षण्मुखविक्रमः॥
बभ्रूव विनियोगज्ञः साधनीयेषु वस्तुषु॥ ६७॥ इति क्रमात्प्रयुञ्जानो दंडनीतिं
चतुर्विधां॥ आतीर्थादप्रतीघातं स तस्याप्रतिमानतोऽन्॥ ६८॥ कूटयुद्धविधि
ज्ञोपि तस्मिन्सन्मार्गयोधिनि॥ भेजेभिसारिकावृत्तिं जयश्रीर्वीरगामिनी॥ ६९॥
आसीत्तत्तापप्रज्ञनत्वाद्वशीनां तस्य दुर्लभः॥ रणो गंधद्विपस्येव गंधभग्नान्यदंति
नः॥ ७०॥ प्रवृद्धौ हीयते चंद्रः समुद्रोपि तथाविधः॥ स तयोः समवृद्धिं च न तयो
ताविवक्षयं॥ ७१॥ संतस्तस्याभिगमनादत्यर्थं महतः कृशाः॥ उदधेरिव जीमू
ताः प्रापुर्दातृत्वमर्थिनः॥ ७२॥ स्तूयमानः सजिह्वाय स्तुत्यमेव समाचरन्॥ तथा
पि प्रथे तस्य तत्कारि द्वेषिणोपयशः॥ ७३॥ दुरितं दर्शनेन घ्नं तत्त्वार्थेन नुदं स्त

गः॥ प्रज्ञाविततसच्चक्रेण्वत्राभ्युत्सूर्य इवोदितः॥७४॥ इंदोरगतयः पद्मे सूर्यस्य
कुमुदं शवः॥ गुणास्तस्य विपक्षेपि गुणिनो लेभिरे तरं॥७५॥ परासंधानपर्यग्रा
प्यस्य विचेष्टितं॥ जिगीषाश्च मेधाय धर्मे ऽपवबन्धुचतत्॥७६॥ एवमुद्घास्य
भावेन शास्त्रनिर्दिष्टवर्त्मना॥ वृषेव द्देवोदेवानां राज्ञां माज्ञां बभ्रुवसः॥७७॥ पंच
मं लोकपालानां तमृचुः साधर्म्ययोगतः॥ भूतानां महतां षष्ठमष्टमं कुलपर्वतं
॥७८॥ दूराप वर्जितच्छत्रैस्तस्याज्ञां शासनार्पितां॥ द्युविरोधिभिरपालाः शेषापो
रंदरीमिव॥७९॥ ऋत्विजः सततयानर्चे दक्षिणाभिर्महाक्रतौ॥ यथा साधारणीकृ
तं नामास्य धनदस्य च॥८०॥ इंद्राद्विष्टि नियमितगदादंकच्च त्तिर्यमो रूपादोना

थः त्रिवर्ग पथः कर्मणो नोवराणां ॥ पूर्यापेक्षीदधनु विदध्ये कोशवृद्धिं कुबेरः
स्तस्मिन्दण्डोपनतचरितञ्चेडिरे लोकपालाः ॥ ८१ ॥ छ ॥ छ ॥ इतिश्रीरघुवं
शेमाहाकाव्येकालिदासकृतौ अतिथिराज्ञावर्णो नाम सप्तदशः सर्गः ॥
सनैषधस्यार्थपतेः सुतायामुत्पादयामासनिषिद्धशत्रुः ॥ अनूनसारं न्निष
धाभगेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव ॥ १ ॥ तेनोरुकार्यैणपितात्रजायेक
ल्पिष्यमाणेननननंदयूना ॥ सुवृष्टियोगादिवजीवलोकः सस्येनसंपत्तिफल
मकेन ॥ २ ॥ शब्दादिनिर्विश्य सुखं चिराय तस्मिन्प्रतिष्ठापितराजशब्दः ॥ को
मद्वतेयः कुमुदावदातैः र्द्यामर्जितां कर्मभिराहरोह ॥ ३ ॥ पौत्रः कुशस्यापि
कुशेशयाक्षः ससागरां सागरधीरचेताः ॥ एकातपत्रां भुवमेकवीरः पुरार्ग

काशीर्चन्तु ओबुभोज॥४॥ तस्यानव्योडा सत्तयास्तदंते वंशश्रीयं त्रापनकासिया
नः॥ योन ड्व्कानीवग जः परेषां बव्कान्य द्वान्ताच्छिनाभयक्रः॥५॥ नसभ्यरेगी
तया॥ सने ॥ नसस्तच्छडुयाम तनुं त रूढं॥ रव्यातं नभः शाच्छमयेन नाम्ना वांत
नभोमा॥ मिवपडा नां॥६॥ तस्मिन्विसर्ज्योत्तर को शव्कानां धर्म्मोत्तर रत्नतः
भवः प्रसूतः॥ नगे रडर्य डरणोयदिष्ट मदेह बंध्यायपुनर्बबंध॥७॥ तेनद्वि
पानामिवपुंडरीको राज्ञामडय्योऽऽ निपुंडरीकः॥ शां तेपितर्यहि तपुंडरीकं
पपुंडरीका क्षमिवाश्रिताश्रीः॥८॥ स क्षेमधन्वा नममोघधन्वा पुत्रं प्रजा क्षेम
विधानदक्षं॥ क्ष्मां लंभयित्वा क्षमयोपपन्नं वनेतपः क्षाम्यतचकार॥९॥ अ
नीकिनीनां समरे ऽग्रयायी तस्यापिदेवप्रतिमः सुतोऽभूत्॥ व्यश्रूयतानीकपदा

१२७ १२७ १२७